**बर्हिपुष्प** पु० बर्हि बर्हयुक्तमिव पुष्पमस्य । मयूरपिच्छतृणे बर्हिकुसुमादयोऽप्यत्र ।

**बर्हिर्मुख** पु० बर्हिर्वह्निर्मुखमस्य । देवे अमरः ।

**बर्हिःशुष्मन्** पु० बर्हिः कुशः बलमस्य । वह्नौ अमरः ।

**बर्हिषद्** पु० ब०व० बर्हिषि सीदति सद्–क्विप् षत्वम् । पितृगणभेदे पितृशब्दे दृश्यम् ।

**बर्हिष्केश** पु० बर्हिः केश इव यस्य । वह्नौ ।

**बर्हिष्मत्** त्रि० बर्हिरस्त्यस्य मतुप् । कुशयुक्ते स्त्रियां ङीप् ।

**बर्हिष्य** त्रि० बर्हिषि दत्तम् यत् । कुशे दत्ते पिण्डादौ ।

**बर्हिष्ठ** त्रि० बर्हिषि कुशे तिष्ठति स्था–क ७त० वा विसर्गलोपः षत्वम् । कुशस्थिते ।

**बर्हिस्** न० बर्ह–कर्मणि इसि । कुशे १यज्ञिये कुशे "निहोता सत्सि बर्हिषि" सामार्चिकम् ।१।१।१। "उपमूललूनं बर्हिः पितॄणां पर्वसु लूनं देवानाम्" कौ०त० । प्राचीनबर्हिस्शब्दे दृश्यम् २दीप्तौ ३अग्नौ च "बर्हिषि रजतं न देयम्" श्रुतिः ।

**बल** जीवने, धान्यावरोधे च भ्वा०पर०सक०सेट् । बलति । अबालीत् बेलतुः । ज्वलादि०कर्त्तरि ण । बलः बालः ।

**बल** दाने बधे निरूपणे च भ्वा०उभ०सक०सेट् । बलति–ते अबालीत् अबलिष्ट । बेलतुः बेले । [बलत् त ।

**बल** जीवने चु०उभ०अक०सेट् मित् घटा० । बलयति–ते अबीबलत् ।

**बल** निरूपणे चु०आत्म०सक०सेट् । बालयते अबीबलत ।

**बल** न० बल–अच् । १सैन्ये २देहजे सामर्थ्ये ३स्थौल्ये ४गन्धरसे ५रूपे मेदि० ६शुक्रे हेमच० ७८देहे जटा० ८पल्लवे शब्दर० ९रक्ते च शब्दच० । १०बलयुक्ते त्रि० मेदि० ११काके १२बलदेवे अमरः । १३वरुणवृक्षे शब्दच० । १४दैत्यभेदे पु० मेदि० । तत्र पारिभाषिकबलानि ब्रह्मवैपु० ३५ अ० उक्तानि यथा

"क्षत्रियाणां बलं युद्धं व्यापारश्च बलं विशाम् । भिक्षाबलं भिक्षुकाणां शूद्राणां विप्रसेवनम् । हरौ भक्तिर्हरेर्दास्यं वैष्णवानां बलं हरिः । हिंसा बलं खलानाञ्च तपस्या च तपस्विनाम् । बलं वेशश्च वेश्यानां योषितां यौवनं बलम् । बलं प्रतापो भूपानां बालानां रुदितं बलम् । सतां सत्यं बलं, मिथ्या बलमेवासतां सदा । अनुगानामनुगमः स्वल्पस्वानाञ्च सञ्चयः । विद्या बलं पण्डितानां वाणिज्यं वणिजां बलम् । शश्वत्सुकर्मशीलानां गाम्भीर्यं साहसं बलम् । धनं बलं च धनिनां शुचीनां शौचमेव च । बलं विवेकः शान्तानां गुणिनां बलमेकता । गुणो बलं च गुणिनां चौराणां चौर्य्यमेव च । विप्रलम्भश्च कापट्यमधर्मकर्मिणां बलम् । हिंसा च हिंस्रजन्तूनां सतीनां पतिसेवनम् । वरशापौ सुराणाञ्च शिष्याणां गुरुसेवनम् । बलं धर्मो गृहस्थानां भृत्यानां राजसेवनम् । बलं स्तवः स्तावकानां ब्रह्म च ब्रह्मचारिणाम् । यतीनाञ्च सदाचारो न्यासः सन्न्यासिनां बलम् । पापं बलं पातकिनां सुभक्तानां हरिर्बलम् । पुण्यं बलं पुण्यवतां प्रजानां नृपतिर्बलम् । फलं बलञ्च वृक्षाणां जलधीनां जलं बलम् । जलं बलञ्च शस्यानां मत्स्यानाञ्च जलं बलम् । शान्तिर्बलञ्च भूपानां विप्राणाञ्च विशेषतः" । "विद्याभिजनमित्राणि बुद्धिसत्त्वं धनानि च । तपःसहायवीर्य्याणि दैवञ्च दशमं बलम्" । भा० शा० ।

वैद्यके सद्योबलकरपदार्थाः संगृह्य दर्शिता यथा "सद्यो बलकरं ज्ञेयं बालाभ्यङ्गः सुभोजनम् । सद्यो बलकरं ज्ञेयं सर्पिश्च मांसमप्युत" । "धातूनां यत् परं तेजस्तत्खल्वोजस्तदेव बलमित्युच्यते" वैद्य० वायुदत्ते १५स्कन्दानुचरभेदे पु० । "बलश्चातिबलश्चैव महावक्त्रौ महाबलौ" भा० श० २५।२६ श्लो० । असुरभेदश्च इन्द्रेण हतः इन्द्रपर्य्याये बलारातिशब्ददर्शनात्" देवीपु० ४७अ० तु स विष्णुना हतः "तदा दत्ता तनुस्तेन दानवेन महात्मना । विष्णुनापि स्वचक्रेण शिरस्यभिहतो बलः । प्राकृतं देहमुत्सृज्य दिव्यकायस्त्वभूत्तदा । तस्यावयवसंजाता वज्राद्या रत्नजातयः । लोचने सुर तेजांसि पद्मरागाणि चाभवन् । विशुद्धपात्रदानेन कायो रत्नाकरोऽभवत्" । [अमरः । अन्तस्थवादिरयमिति स्वामी ।

**बलक्ष** पु० बलं क्षायत्यस्मात् क्षै–क । १शुक्लवर्णे । २तद्वति त्रि० ।

**बलज** न० बलात् जायते जन–ड । १क्षेत्रे २पुरद्वारे ३शस्ये ४युद्धे च । ५बलजाते त्रि० मेदि० । ६वरयोषायां ७यूथिकायां च स्त्री मेदि० ।

**बलद** पु० बलं ददाति दा–क । "पौष्टिके बलदः स्मृतः" १ पौष्टिककर्माङ्गे वह्निभेदे । २ अश्वगन्धायां स्त्री । राजनि० ३बलदातरि त्रि० । ४जीवके पु० राजनि० ।

**बलदीनता** स्त्री ३त० । ग्लानौ हेमच० ।

**बलदेव** पु० बलेन दीव्यति दिव–अच् बलोद्रिक्तो देवो वा शाक०त० । १बलरामे "बलदेवो बलोद्रेकात्" ब्रह्मवै० जं०ख० ४२ अ० । २त्रायमाणौषधौ स्त्री अमरः । ३वायौ पु० मेदि० ।